अष्टादश पुराणानि चरितं राघवस्य च । रामस्य कुरुशार्दूल धर्म्मकामार्थसिद्धये ॥ तथोक्तं भारतं वीर ! पाराशर्य्येण धीमता । वेदार्थं सकलं योज्य धर्म्मशास्त्राणि च प्रभो !" इति भविष्यपुराणवचनाच्चैषां पौराणिकादिर्विधिः । योज्य योजयित्वा । अत्र च "श्राद्धं वेदमन्त्रवर्ज्जं शूद्रस्य इति वचने वेदेत्युपादानात् श्राद्धे पुराणमन्त्रः शूद्रेण पठनीय इति मैथिलोक्तं तन्न वराहपुराणे शूद्राणां मन्त्रवर्जित इत्यनेन मन्त्रमात्रनिषेधात् मत्स्यपुराणे नमस्कारेण मन्त्रेण इत्युपादानाच्च पौराणिकस्यापि श्राद्धे निषेधः प्रतीयते । एवं स्नानेऽपि "ब्रह्मक्षत्रविशामेव मन्त्रवत् स्नानमिष्यते । तूष्णीमेव हि शूद्रस्य सनमस्कारकं मतम्" इत्यनेन नमस्कारविधानात् पञ्चयज्ञेऽपि । "शूद्रस्य द्विजशुश्रूषा तया जीवनवान् भवेत् । शिल्पैर्वा विविधैर्जीवेत् द्विजातिहितमाचरन् । भार्य्यारतिः शुचिर्भृत्यभर्त्ता श्राद्धक्रियारतः । नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत्" इति नमस्कारमात्रविधानात् श्राद्धादिषु पौराणिकमन्त्रनिषेधः । ततश्च स्नानश्राद्धतर्पणपञ्चयज्ञेतरत्र शूद्रस्य पौराणिकमन्त्रपाठः प्रतीयते । अत्र "षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले" इति मनुवचनात् "चूडा कार्य्या यथाकुलम्" इति याज्ञवल्क्यवचनाच्च संस्कारमात्रे कुलधर्म्मानुरोधेन कालान्तरस्य नामविशेषोच्चारणस्याभिधानाच्च शूद्रादीनां नामकरणे वसुघोषादिकपद्धतियुक्तनामकरणस्य च प्रतीतेर्वैदिककर्म्मणि शूद्राणां पद्धतियुक्तानामाभिधानं क्रियते इति" । शूद्रस्याचमने दैवतीर्थेन ओष्ठे जलं सकृत्क्षिपेत् न पिबेत् तथा च याज्ञवल्क्यः "हृत्कण्ठतालुगाभिस्तु यथासंख्यं द्विजातयः । शुध्येरन् स्त्री च शूद्रश्च सकृत् स्पृष्टाभिरन्ततः" । अन्ततो हृदयादिसमीपेन ओष्ठेन उत्तराधरसम्पर्कात् अतएव स्पृष्टाभिरित्युक्तं न तु भक्षिताभिरिति "स्त्रीशूद्रः शुध्यते नित्यं क्षालनाच्च करोष्ठयोः" इति ब्रह्मपुराणवचनाच्च । याज्ञवल्क्यः "प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्" अत्र द्विजस्याचमने ब्राह्मतीर्थोपादानात् स्त्रीशूद्रयोर्न तेनाचमनम् एवमेव मिताक्षरायां व्यक्तमुक्तं मरीचिना "स्त्रियास्तु दक्षिणं तीर्थं शूद्रजातेस्तथैव च । सकृदाचमनाच्छुद्धिरेतयोरेव चोभयोः" इति । एतदनन्तरम् इन्द्रियादिस्पर्शनन्तु ब्राह्मणवदेव प्रमाणान्तरन्तु वाजसनेयिसामगश्राद्धाह्निकतत्त्वयोरनुसन्धेयम्" आ०त० रघु० ।

**शूद्रकर्म्मन्** न० शूद्रस्य शास्त्रविहितं कर्म्म । शूद्रकर्त्तव्ये द्विजसेवादौ शूद्रकृत्यादयोऽप्यत्र ।

**शूद्रप्रिय** पु० ६त० । पलाण्डौ राजनि० ।

**शूद्राधिकरण** शूद्रस्य विद्यायामधिकारोऽस्ति नवेति सन्देहे नाधिकार इति निर्णायके शारीरकसूत्रोक्ते अधिकरणभेदे तच्चाधिकरणं तत्र दर्शितं यथा

"शुगस्य तदनादरश्रवणात्तदाद्रवणात् सूच्यते हि" सू० "यथा मनुष्याधिकारनियममपोद्य देवादीनामपि विद्यास्वधिकार उक्तस्तथैव द्विजात्यधिकारनियमापवादेन शूद्रस्याप्यधिकारः स्यादित्येतामाशङ्कां निवर्त्तयितुम् इदमधिकरणमारभ्यते । तत्र शूद्रस्याप्यधिकारः स्यादिति तावत् प्राप्तम्, अर्थित्वसामर्थ्ययोः सम्भवात्, "तस्माच्छूद्रो यज्ञेऽनवकॢप्तः" इतिवत् शूद्रो विद्यायामनवकॢप्त इति निषेधाश्रवणात् । यच्च कर्म्मस्वनधिकारकारणं शूद्रस्यानग्नित्वं न तद्विद्यास्वधिकारस्यापवादकम् । न ह्याहवनीयादिरहितेन विद्या वेदितुं न शक्यते । भवति च लिङ्गं शूद्राधिकारस्योपोद्बलकं, संवर्गविद्यायां हि जानश्रुतिं पौत्रायणं शुश्रूषुं शूद्रशब्देन परामृशति "अह हारे त्वा शूद्र ! तवैव सह गोभिरस्तु" इति । विदुरप्रभृतयश्च शूद्रयोनिप्रभवा अपि विशिष्टविज्ञानसम्पन्नाः स्मर्य्यन्ते, तस्मादधिक्रियते शूद्रो विद्यास्वित्येवं प्राप्ते ब्रूमः । न शूद्रस्याधिकारो वेदाध्ययनाभावात् । अधीतवेदो हि विदितवेदार्थो वेदार्थेष्वधिक्रियते, न च शूद्रस्य वेदाध्ययनमस्ति, उपनयनपूर्ब्बकत्वाद्वेदाध्ययनस्य उपनयनस्य च वर्णत्रयविषयत्वात् । यत्त्वर्थित्वं न तदसति सामर्थ्येऽधिकारकारणं भवति । सामर्थ्यमपि न लौकिकं केवलमधिकारकारणं भवति शास्त्रीयेऽर्थे शास्त्रीयस्य सामर्थ्यस्यापेक्षितत्वात् शास्त्रीयस्य च सामर्थ्यस्याध्ययननिराकरणेन निराकृतत्वात् । यच्चेदं शूद्रो यज्ञेऽनवकॢप्त इति तत् न्यायपूर्ब्बकत्वाद्विद्यायामप्यनवकॢप्तत्वं द्योतयति न्यायस्य साधारणत्वात् । यत् पुनः संवर्गविद्यायां शूद्रशब्दश्रवणं लिङ्गं मन्यसे न तल्लिङ्गम्, न्यायाभावात् । न्यायोक्ते हि लिङ्गदर्शनं द्योतकं भवति, न चात्र न्यायोऽस्ति कामञ्चायं शूद्रशब्दः संवर्गविद्यायामेवैकस्यां शूद्रमधिकुर्य्यात् तद्विषयत्वात् न सर्व्वासु विद्यासु, अर्थवादस्थत्वात् न तु क्वचिदप्ययं शूद्रमधिकर्त्तुमुत्सहते । शक्यते चायं शूद्रशब्दोऽधिकृतविषये योजयितुम् । कथमित्युच्यते । "कं वर एनमेतत् सन्तं